# *Sree*
# *Buddha-Charithamritham*

BY M. D. Srihari

Srimathi

Mandayam Dhati Alamelamma

MYSORE:
PRINTED AT THE JAYALAYA PRESS
1922. ← 1922

( *All rights Reserved* )

# विज्ञप्तिः ।

सकल वाङ्मातृस्थानभूत देवभाषायां, आर्यबालानां बालिकानां च, अभिरुचिमुत्पादयितुं, ललितपद वाक्यप्रयोगेन शिष्ट-मतानुमोदित नीतिसारसमन्वितं, श्री बुद्धचरितं रचितं भवति ।

म. धाटि. अलमेलम्म.

I have gone through the original work of Srimathi Alamelamma in course of i s printing at Sri Jayalaya Press Mysore, to which I am the Propritor.

I am of opinion that this work is written in a simple style, so as to be easily understood by the beginners of the Sanskrit Language, and no doubt it brings credit, to the sex, to which she belongs.

6th Feber 1922 } R. RAGHAVENDRACHARYA,
Mysore. } *Palace Dharmadhikari.*

---

॥ श्रीः ॥

# श्री बुद्धचरितामृतम् ॥

भवपाशविनिर्मुक्त मप्रमेयमनामयम् ।
करुणामृतसंपूर्णं देवं वन्दे जगद्गुरुम् ॥

## —* अथ प्रथमोऽध्यायः *—

जम्बूद्वीपोत्तरे भागे वर्तते हि महान् गिरिः ।
हिमवानिति विख्यातो वहुशृङ्गोपशोभितः ॥ १ ॥

गिरेस्तस्य महाकूटा वारयंति समंततः ।
घनजीमूतसन्दोहं धावन्तं दिशमुत्तराम् ॥ २ ॥

निरुद्धास्ते जलधराः वर्षंति विपुलं जलम् ।
स्रोतोवहास्सहस्राणि प्रवहंति गिरेस्तटे ॥ ३ ॥

भवत्यत्र महारण्यं पृष्ठे हिमवतो गिरेः ।
दशयोजनविस्तीर्णं विंशद्योजनमायतम् ॥ ४ ॥

हंसकारण्डवाकीर्णं सारसैरुपशोभितम् ।
चक्रवाकमयूरैश्च नानावर्णखगैर्युतम् ॥ ५ ॥

दात्यूहशारिकाकीर्णं सर्वपक्षिगणावृतम् ।
कापोतस्य मयूराणां निनादैरुपशोभितम् ॥ ६ ॥

नानामृगगणाकीर्णं सिंहशार्दूलसेवितम् ।
नीलाभ्रबृन्दसंकाशहस्तियूथैस्समन्वितम् ॥ ७ ॥

(3)

नातिदूरे वनात्तस्मात्प्रख्यातो वसुधातले ।
शक्यदेश इति ख्यातो भ्राजते शक्यपालितः ॥ ८ ॥

उद्यानानि च रम्याणि वनान्युपवनानि च ।
इतस्ततो विराजन्ते राष्ट्रे बहुसुखप्रदे ॥ ९ ॥

विपुलेऽस्मिन् महादेशे तत्रासील्लोकविश्रुता ।
कापिला* नाम नगरी कासारैरुपशोभिता ॥ १० ॥

सा भाति नगरी दिव्या साट्टप्राकारतोरणा ।
परितश्चावृता दुर्गैः कवाटार्गळसंयुतैः ॥ ११ ॥

प्राकारमूर्ध्नि न्यस्ताभि श्शतघ्नीशतपङ्क्तिभिः ।
इषुक्षेपैश्शिलाक्षेपैः यन्त्रैश्च विविधैर्युता ॥ १२ ॥

अत्र योधा महेष्वासा वायुसूनुपराक्रमाः ।
रक्षन्ति नगरीं रम्यां सर्वे देशहिते रताः ॥ १३ ॥

मदमत्तमयूराणां कोकिलानां च निस्वनः ।
कलहंसकपोतानां विरावास्सुमनोहराः ॥ १४ ॥

वेदघोषश्च विप्राणां निर्झराणां तु झर्झरः ।
श्रूयन्ते किल सर्वत्र ये चान्ये मधुरस्वराः ॥ १५ ॥

सुसम्मृष्टाश्च विद्यन्ते रथ्याः पद्यास्सहस्रशः ।
पन्थानः पादचारीणां वर्तन्ते हि पृथक्पृथक् ॥ १६ ॥

* अथवा कपिलवस्तु ॥



पार्श्वे तु राजमार्गस्य सालवृक्षास्सुवर्धिताः ।
वितरन्ति सदा छायां संश्रितानां सुखप्रदाम् ॥१७॥

हर्म्यप्रासादसत्रैश्च महादेवालयैस्तथा ।
गृहैश्च विविधैर्युक्ता भासते सा महापुरी ॥१८॥

राजा शुद्धोदनो नाम पुण्यश्लोकप्रतापवान् ।
सेवितस्सचिवैः श्रेष्ठैः राजतन्त्रविशारदैः ॥१९॥

आश्रितश्च महाप्राज्ञः विद्वद्भिर्वेदपारगैः ।
पूजितस्स महावीरो बहुभिश्शस्त्रकोविदैः ॥२०॥

तां तावन्नगरीं श्रेष्ठां कापिलां लोकविश्रुताम् ।
पालयामास धर्मात्मा सर्वैरर्चितशासनः ॥२१॥

बभूव नृपतेस्तस्य भार्या सर्वाङ्गसुन्दरी ।
मायादेवीति विख्याता सर्वलक्षणसंयुता ॥२२॥

कल्याणगुणसंपन्ना सर्वाभरणभूषिता ।
पतिव्रता धर्मचारी साऽभवद्भर्तृनन्दिनी ॥२३॥

सा धर्मशास्त्रतत्त्वज्ञा नारीणामुत्तमा वधूः ।
राजकार्येषु सर्वेषु पत्युस्साहाय्यमातनोत् ॥२४॥

इति प्रथमोऽध्यायः ।

## ॥ अथ द्वितीयोऽध्यायः ॥

तस्य चेदक्प्रभावस्य नृपतेश्च महात्मनः ।
पुत्रार्थं तप्यमानस्य नासीद्वंशकरस्सुतः ॥२५॥

राजा चिंतापरो भूत्वा तर्कयामास नित्यशः ।
अपत्यार्थं महाराजो ग्रहुमैच्छन्महाव्रतः ॥२६॥

आहूय सचिवान् सर्वान् गुरूंस्तान् सपुरोहितान् ।
ब्राह्मणप्रमुखान् सर्वानिदमाह महीपतिः ॥२७॥

अहो बत महत्पापं कृतवान् पूर्वजन्मनि ।
तेनाहमनपत्योस्मि यूयं जानीत वै द्विजाः ॥२८॥

" अपुत्रस्य गतिर्नास्ति " इत्येवं मनुरब्रवीत् ।
तस्माच्छोचामि वै नित्यं संतानार्थं भृशं तथा ॥२९॥

तस्य तद्वचनं श्रुत्वा महीपालस्य धीमतः ।
तमब्रुवन्गुरुश्रेष्ठाः वाक्यं वाक्यविशारदाः ॥३०॥

श्रूयन्ते बहवो मार्गाः सर्वशास्त्रानुमोदिताः ।
आश्रित्य तान् पुत्रकामाः लभन्ते वांछितं फलम् ॥

वेदोक्तैर्विविधैर्यज्ञै स्तथा दानैश्च सात्विकैः ।
नानाविधैस्तपोभिश्च प्रापुर्मानवास्सुतम् ॥३२॥

तेषां तद्वचनं श्रुत्वा प्रोवाचेदं नराधिपः ।
इष्टिं संतानकामस्य युक्तामाज्ञापयंतु मे ॥३३॥



दृष्ट्वैवं शोकसंतप्तं राजानं तेऽब्रुवन्वचः ।
क्रियतां हयमेधस्तु येन पुत्रमवाप्स्यसि ॥३४॥

एवमुक्त्वा तु राजानं सर्वे ते हृष्टमानसाः ।
अगच्छन् स्वगृहान् शीघ्रं विधिवद्राजपूजिताः ॥३५॥

मायादेवी महाप्राज्ञा पत्नी तस्य महात्मनः ।
पश्यंती त्वनपत्यत्वं भृशं बभूव दुःखिता ॥३६॥

कदाचित्तत्र भिक्षार्थं राजद्वारमुपागतम् ।
वृद्धं यतिवरं कंचित्सा त्वपश्यत्तपोधनम् ॥३७॥

कारयामास पूजां वै यतेस्तस्य महात्मनः ।
पूजातृप्तस्स धर्मात्मा महिषीमिदमब्रवीत् ॥३८॥

सन्तुष्टोऽस्मि महादेवि! सत्कारेण तवानघे ।
किं ते दुःखं महाराज्ञी ब्रूहि सत्यं मनोगतम् ॥३९॥

प्रतीकारं करिष्यामश्शोकस्य तव सर्वदा ।
माभैषीस्त्वं महाभागे वद सर्वं शुभानने ॥४०॥

प्रणम्य शिरसा देवी पूजार्हं तं यतीश्वरम् ।
उवाच वचनं दिव्यमिदं मधुरया गिरा ॥४१॥

धन्यास्मि पाविताहं च भवत्पादाब्जवंदनात् ।
यदागत्य गृहं देव दत्तवान् दर्शनं महत् ॥४२॥

सादरं तु यतिश्रेष्ठ शृणुष्व वचनं मम ।
वदामि तत्वतस्तुभ्यं यन्मे शोकस्य कारणम् ॥४३॥

मुने! शुद्धोदनो नाम गौतमान्वयसंभवः ।
कृत्स्नां महीं पालयति राजा परमधार्मिकः ॥४४॥

तस्य कामयमानस्य प्रजानामनुरंजनम् ।
काले गते बहुतिथे नासीद्वंशकरस्सुतः ॥४५॥

भार्याऽहं तस्य नृपतेर्विद्वद्भिस्सेवितस्य वै ।
मम लालप्यमानायाः पुत्रार्थं नास्ति वै सुखम् ॥४६॥

वेदशास्त्रार्थतत्त्वज्ञ तापसानां धुरंधर! ।
कुरुष्व मम कार्यं वै कृपा चेन्मुनिपुंगव ॥४७॥

कृशांगीं दीनवदनां मश्रुपूर्णाकुलेक्षणाम् ।
कृपया परयाविष्टः बभाषे मुनिसत्तमः ॥४८॥

प्रातरुत्थाय सुभगे गच्छ त्वं रोहिणीं नदीम् ।
शास्त्रोक्तविधिना स्नानं कुरु तत्र यशस्विनी ॥४९॥

ततस्त्वं मनसि ध्यात्वा युष्माकं कुलदेवताम् ।
पूजयस्वैकाग्रचित्ता शंकरीं लोकपावनीम् ॥५०॥

जगद्धात्रीं महादेवीं वरदां कामरूपिणीम् ।
अमृतस्यंदिनीं नित्यां कपिलां पिंगळां कलाम् ॥५१॥

कात्यायनीं महाभागां महामालाविभूषणाम् ।
दारिद्र्यदुःखशमनीं सिद्धविध्याधरार्चिताम् ॥५२॥

अचिरादेव सुमुखि! लभसे वांछितं फलम् ।
एवमुक्त्वा यतिश्रेष्ठो जगाम च यथागतम् ॥५३॥

— इति द्वितीयोध्यायः —



॥ अथ तृतीयोऽध्यायः ॥

सा नमस्कृत्य पूर्वेभ्यो गुरुभ्यश्च वरानना ।
अपूजयत्परां शक्तिं श्रद्धाभक्तिसमन्विता ॥५४॥

मायादेव्यनवद्यांगी देवी ध्यानपरायणा ।
सायं प्रातः पराशक्त्याः स्तोत्रमाह मुदान्विता ॥५५॥

एतस्मिन्नंतरे देवी तन्वंगी चारुदर्शनी ।
ददर्श सुमहास्वप्नमद्भुतं च भयावहम् ॥५६॥

प्रातरुत्थाय सा देवी भर्तुरंतिकमाययौ ।
आगच्छंतं पतिं दृष्ट्वा त्विदं वचनमब्रवीत् ॥५७॥

शृणु राजन्! माहाबाहो सादरं वचनं मम ।
स्वप्नोऽद्य मया दृष्टो दारुणो रोमहर्षणः ॥५८॥

तेजोराशिं प्रपश्यामि तिष्ठंतं विमलेम्बरे ।
तत्तेजोऽभूद्गजो दिव्यः षड्दन्तस्सुमनोहरः ॥५९॥

द्विपेन्द्रश्शैलसंकाशः ऐरावतसमप्रभः ।
आगत्य वायुवेगेन प्रविवेशोदरं मम ॥६०॥

श्रुत्वा हि वचनं तस्याः राजा प्रमुदितोऽवदत् ।
पृच्छामि तावच्छास्त्रज्ञान् फलं स्वप्नस्य सुन्दरी ॥६१॥

ज्ञातुमिच्छन् फलं तस्य स्वप्नस्य नरपुंगवः ।
आहूय किंकरान्सर्वानिदं वचनमब्रवीत् ॥६२॥

गच्छत त्वरितं यूयं राजाज्ञापरिपालिताः ।
आनीयंतां मद्वचनात् पंडितास्शास्त्रकोविदाः ॥६३॥

अथ दृष्ट्वा तु तान् सर्वानागतान्विप्रसत्तमान् ।
विनयेनाब्रवीद्राजा वाक्यं वाक्यविशारदः ॥६४॥

महिष्याः मम सर्वज्ञाः दृष्टो यस्स्वप्न उत्तमः ।
विस्तरेण प्रवक्ष्यामि यूयं श्रुणुत सादरम् ॥६५॥

न्यवेदयत्ततस्सर्वं राजा परमधार्मिकः ।
उवाच वचनं विप्रान् सकलागमपारगान् ॥६६॥

शुभोवाप्यशुभस्स्वप्न स्तन्नवेद्मि कदाचन ।
भवंत एव जानंति स्वप्नस्य फलमीदृशः ॥६७॥

यत्त्वया कथितं राजन्नस्माभिरखिलं श्रुतम् ।
क्षिप्रं तु राजमहिषी नूनं भवति गर्भिणी ॥६८॥

जनयिष्यति सा देवी सुतं लोकहितावहम् ।
एवमुक्त्वा तु राजानं जग्मुस्ते राजपूजिताः ॥६९॥

एवं विसृज्य तान्विप्रान् राजा पूर्णमनोरथः ।
अवसत्तत्र भूपालास्सुतोत्पत्तिं विचिंतयन् ॥७०॥

मासद्वयांतरे देवी गर्भचिह्नानि भेजिरे ।
दौहृदैर्विविधैः पत्नीं तोषयामास भूपतिः ॥७१

ततश्च द्वादशे मासे राज्ञी चाऽजनयत्सुतम् ।
ज्येष्ठमघ्यां सिते पक्षे द्वितीयातिथिसंयुते ॥७



वासरे तु भृगोर्दिव्ये नक्षत्रे हस्तनामनि ।
॥७३॥

कन्याराशिं गते सोमे तथा लग्ने शुभावहे ।
श्रीमानाविरभूद्भूमौ सिद्धार्थो नाम भास्करः ॥७४॥

धर्मसंस्थापनार्थाय ये भवंति युगे युगे ।
तेषां देहे तु चिह्नानि दृश्यन्ते यानि वैबुधैः ॥७५॥

तानि सर्वाणि चिह्नानि सुते पश्यन्निजे नृपः ।
शिशुं तं पितरौ दृष्ट्वा मग्नावानंदसागरे ॥७६॥

—* इति तृतीयोऽध्यायः *—

॥ अथ चतुर्थोऽध्यायः ॥

रमणीया च प्रसन्ना च रोहिणी यत्र वर्तते ।
तस्याः पुण्यांबुपूर्णायास्तटे भाति महाश्रमः ॥७७॥

पुण्याश्रमो विभात्यत्र सेवितश्च महात्मभिः ।
मधुमूलफलोपेतो नानापक्षिसमन्वितः ॥७८॥

एतस्मिन्नाश्रमे दिव्ये उवास मुनिपुङ्गवः ।
असितो वै ऋषिर्नाम तेजस्वी लोकविश्रुतः ॥७९॥

जितेन्द्रियो विशुद्धात्मा तपश्चरति संयमी ।
गगनादुत्थितां वाणीं शुश्रावेमां महामुनिः ॥८०॥

अहो ते तपसा ब्रह्मन् लब्धोऽसि तपसः फलम् ।
शुद्धोदनस्य हर्म्येतु दृश्यते हि परात्परः ॥८१॥

गच्छ त्वं त्वरितं देव यत्राऽऽस्ते नृपनंदनः ।
प्रणम्य शिरसा बालं सर्वलोकदिवाकरम् ॥८२॥

धर्मज्ञं च महात्मानं करुणारससागरम् ।
कृतार्थश्च भवेत्युक्त्वा वाणी सांतरधीयत ॥८३॥

मुनिस्तद्वचनं श्रुत्वा विस्मयं परमं ययौ ।
ऋषिस्तु परमप्रीतो जगाम नृपमंदिरम् ॥८४॥

नररूपधरं ब्रह्म दृष्ट्वा वै मुनिपुंगवः ।
अश्रुपूर्णस्सधर्मात्मा स्तोत्रमाहमुदान्वितः ॥८५॥

धन्योऽस्मि कृतकृत्योऽस्मि कृतार्थोऽस्मि महाप्रभो ।
त्वत्पादवंदनादेव विमुक्तोऽस्मि न संशयः ॥८६॥

कर्मबन्धविनाशस्तु त्वज्ज्ञानादुपजायते ।
त्वद्दर्शनान्महादेव छिद्यन्ते सर्वसंशयाः ॥८७॥

अथ बुद्धं महात्मानमसितं ऋषिसत्तमम् ।
दृष्ट्वा च प्रांजलिर्भूत्वा राजा वचनमब्रवीत् ॥८८॥

अहमस्मि शिशोरस्य प्रभावं ज्ञातुमक्षमः ।
माहात्म्यं यदि जानासि सर्वं तद्वक्तुमर्हसि ॥८९॥

क्षितिपस्य वचश्श्रुत्वा मुनिराह मुदान्वितः ।
अहं वेद्मि महाभाग बालं सत्यपराक्रमम् ॥९०॥



अवेहि तनयं राजन् धर्मविज्ञानरूपिणम् ।
मानुषं तनुमापन्नं लोकानुग्रहकारणम् ॥९१॥

राज्यं सुखं तथा पत्नीं मित्राणि पितरौ तथा ।
सर्वं संत्यज्य पुत्रस्ते वनं यास्यति निश्चितम् ॥९२॥

कन्दमूलफलाहार स्तपस्तप्यति दारुणम् ।
ध्यानात् प्राप्य परं ज्ञानं लभते शांतिमुत्तमम् ॥९३॥

एवमुक्त्वा मुनिश्रेष्ठो जगाम निजमाश्रमम् ।
आश्रमं च गते तस्मिन् राजा चिंतापरो बभौ ॥९४॥

अथाष्टमे तु दिवसे मायादेवी सुमध्यमा ।
लालयंत्येव तनुजमकस्मान्मरणं ययौ ॥९५॥

महाप्रजावती नामा योषा काचिद्वरानना ।
पोषयामास तन्वंगी सुतं दिव्यं महीपतेः ॥९६॥

ततः पुत्रस्तु सिद्धार्थश्चेष्टितैर्मुग्धभाषितैः ।
रमयामास पितरं जगदानंदकारकः ॥९७॥

अथ तस्य कुमारस्य सिद्धार्थस्य च धीमतः ।
वेदशास्त्रोक्तकर्माणि कारयामास वै नृपः ॥९८॥

आसन्नामानिचत्वारि सूनोस्तस्य महीपतेः ।
सिद्धार्थश्चार्कबंधुश्च शक्यसिंहश्च गौतमः ॥९९॥

विद्याप्रारंभकाले तु राजा परमधार्मिकः ।
तोषयामास विप्रेन्द्रान् दानैश्च विविधैश्शुभैः ॥१००॥

धनुर्विद्यां च साहित्यं नीतिविद्यां तथैव च ।
सिद्धार्थाय ददौ सर्वं विश्वामित्रो महागुरुः ॥१०१॥

— इति चतुर्थोऽध्यायः —

॥ अथ पंचमोऽध्यायः ॥

कदाचिद्धंससंघातः प्रयाति स्म विहायसि ।
उत्पतंतं तु तं दृष्ट्वा देवदत्तप्रतापवान् ॥१०२॥

जघानैकेन बाणेन मुखरं चारुदर्शनम् ।
हंसस्तु निहतस्तेन पपात धरणीतले ॥१०३॥

तं समुद्वीक्ष्य धर्मात्मा सिद्धार्थः करुणानिधिः ।
बभूव शोकसंतप्तो बाष्पपर्याकुलेक्षणः ॥१०४॥

रुधिरेणावलिप्तांगं क्रन्दंतं दीननिस्वनम् ।
अंके निजे तमुत्क्षिप्य सांत्वयामास गौतमः ॥१०५॥

कृपाविष्टस्य तस्याथ गौतमस्य महात्मनः ।
समीपं त्वरयाऽगच्छद्देवदत्तस्सुवीर्यवान् ॥१०६॥

दृष्ट्वा तु गौतमं तत्र देवदत्तोऽब्रवीद्वचः ।
तवांके मित्र पश्यामि खेचरं निहतं मया ॥१०७॥

स्वामित्वं तस्य हंसस्य वर्तते मय्यसंशयः ।
तस्मात्त्वमिदग्रपतितं पक्षिणं दातुमर्हसि ॥१०८॥



तस्य तद्वचनं श्रुत्वा सिद्धार्थः क्रोधमूर्छितः ।
उवाच वचनं धीमान् करुणैरुपशोभितम् ॥१०९॥

पश्य त्वया कृतं कार्यमनार्यं लोकनिंदितम् ।
स्वेच्छाविहारं विहगं यदेनं हतवानसि ॥११०॥

पक्षिणं ते नदास्येहं सत्यमेतद्वचो मम ।
न हि पश्यामि भद्रं ते ईदृशः क्रूरकर्मणः ॥१११॥

प्राणा यथा मनुष्याणां भूतानामपि ते प्रियाः ।
आत्मौपम्येन सर्वेषु दयां कुर्वंति वै बुधाः ॥११२॥

देवदत्तस्तु तच्छ्रुत्वा विस्मयं परमं ययौ ।
अथासावब्रवीद्वाक्यं धनुर्वेदविदां वरः ॥११३॥

धर्मस्य तु परिज्ञाने विद्वांसोऽप्यत्र मोहिताः ।
बालस्त्वमपि सिद्धार्थ धर्मसूक्ष्मं प्रभाषसे ॥११४॥

अत्र धर्मं प्रवक्ष्यामि वृद्धैराचरितं महत् ।
धर्मं चेच्छ्रोतुकामोऽसि शृणुष्व वचनं मम ॥११५॥

सूर्यवंशसमुद्भूताः पार्थिवाश्च महारथाः ।
सर्वे ते मृगया शीला बभूवुरिति शुश्रुमः ॥११६॥

क्षत्रियाश्च तथा वैश्याः शूद्राश्चाप्यपरे जनाः ।
यज्ञव्याजेन विप्रास्तु सर्वे ते मांसभक्षिणः ॥११७॥

यज्ञार्थं भोजनार्थं वा सत्काराय तथाऽतिथेः ।
पशुपक्षिमृगादीनां हनने नास्ति किल्बिषम् ॥११८॥

यद्यदाचरितं पूर्वैः श्रेष्ठैश्च क्षितिपोत्तमैः ।
तत्तदेवानुगच्छामि न दोषो ह्यत्र दृश्यते ॥११९॥

तस्मात्प्रयच्छ विहगमार्जितं मत्पराक्रमैः ।
स्वयं यदीहसे मित्र प्रदास्यामि न संशयः ॥१२०॥

एवं स्थिते विवादे वै उभयोरन्तरे तदा ।
प्राविशद्योगसंपन्नः तत्र कश्चिन्मुनीश्वरः ॥१२१॥

तयोर्विवादमाकर्ण्य प्रोवाच मुनिसत्तमः ।
प्राणघ्नात्त्रिषु लोकेषु प्राणदाताऽतिरिच्यते ॥१२२॥

प्राणघ्नो देवदत्तस्तु हंसं नार्हति रक्षितुम् ।
अत एव च सिद्धार्थः त्राता भवति पक्षिणः ॥१२३॥

ऋषेर्वाक्यं तदाकर्ण्य तुष्टास्सन्ति महाजनाः ।
तदा सर्वेषु पश्यत्सु महासर्पोऽभवदृषिः ॥१२४॥

स गत्वा तु कियद्दूरं क्षणेनान्तरधीयत ।
देवदत्तादयस्सर्वे विस्मयं परमं ययुः ॥१२५॥

—* इति पंचमोऽध्यायः *—

॥ अथ षष्ठोऽध्यायः ॥

कदाचिद्गौतमः प्राज्ञो वनं द्रष्टुमपेक्षया ।
आज्ञां च पितुरादाय वनं रम्यमुपागमत् ॥१२६॥



तत्रापश्यद्बहून् वृक्षान् पत्रपुष्पफलैर्युतान् ।
पक्षिणां तु विचित्राणां शुश्राव मधुरान्स्वरान् ॥१२७॥

रमणीये वने तस्मिन् राजते हि महत्सरः ।
मत्स्यैश्च विविधैर्दिव्यैः कुळीरैः कमठैस्तथा ॥१२८॥

सारसैर्हंसकादम्बैरन्यैश्च जलचारिभिः ।
एतैस्संयुतकासारं दृष्ट्वा सोऽभून्मुदान्वितः ॥१२९॥

ततः कमलपुष्पैश्च भासमानं सरोवरम् ।
अभ्युपेत्य नरश्रेष्ठः चिंतयामास गौतमः ॥१३०॥

नृत्यतीह मयूरश्च कुर्वन्केकारवं मुहुः ।
क्रीडन्ते पक्षिणस्सर्वे लीलया पुळिनेषु ना ॥१३१॥

मधुपानेन मुदिताः द्विरेफास्तत्र सर्वतः ।
बाधन्ते मुखपद्मानि युवतीनां पुनः पुनः ॥१३२॥

यथाकामं तृणान् भुक्त्वा पीत्वा च मधुरं पयः ।
मृगशावस्तु छायायां सुखं स्वपिति निर्भयः ॥१३३॥

पूर्णमेतज्जगत्सर्वमानन्देनेति भाति मे ।
पुनरागत्य पश्यामि सत्यमेतन्न वेति च ॥१३४॥

परेद्युश्शाक्यसिंहश्च कासारमगमत्पुनः ।
अपश्यत्तत्रद्रष्टव्यं यदासीच्छावशेषतः ॥१३५॥

तिमिंगिळगिलोप्यस्ति तद्गिळोप्यस्ति राघवः ।
कुळीरः खादते कीटान् मत्स्यांश्च जलपक्षिणः ॥१३६॥

कूरव्याघ्रेण निःनास्सन्ति तत्र मृगादयः ।
नागा गः ति मण्डूकानुलूका पक्षिशावकान् ॥१३७॥

निहत्यान्यानि भूतानि लोके जीवंति जन्तवः ।
कथमेतज्जगत्सर्वं देहिनां तुष्टि कारणम् ॥१३८॥

चिंतयन्मनसा सर्वं शक्यसिंहो दयापरः ।
निर्जगाम वनात्तस्मात्तदा शोकेन पीडितः ॥१३९॥

कथं निवार्यते दुःखं भूतानामीदृशं खलु ।
एवं चितापरश्चासीद्गौतमः करुणानिधिः ॥१४०॥

गौतमस्य मुखाच्छ्रुत्वा यद्वृत्तं सरसस्तटे ।
राजा सुतविनोदाय चकार मतिमान्मतिम् ॥१४१॥

वासार्थं शक्यसिंहस्य पिता शुद्धोदनस्ततः ।
प्रासादं कारयामास शिल्पिभिर्लोकविश्रुतैः ॥१४२॥

उद्यानेन च रम्येण पल्वलेन तथा युते ।
प्रासादे सर्वभोग्येस्मिन् कालं चिक्षेप गौतमः ॥१४३॥

विदित्वा तु मनोभावं सिद्धार्थस्य च धीमतः ।
आहूय सचिवश्रेष्ठं राजा वचनमब्रवीत् ॥१४४॥

शैशवे मम पुत्रस्य कश्चिदाह महामुनिः ।
एष ते बालकश्रीमान् वनं यास्यति निश्चितम् ॥१४५॥

तपस्तप्यति मेधावी तीव्रं लोकहिताय वै ।
विज्ञानं परमं प्राप्य शोभते भास्करो यथा ॥१४६॥



जन्मकाले शिशोरस्य लिखितां जन्मपत्रिकाम् ।
समीक्ष्य गणकाः केचित् इदं वचनमब्रुवन् ॥१४७॥

लक्ष्मीवान् गुणसंपन्नः पुत्रस्तव महीपते ।
चतुरन्तमहीपालो नूनं भवति गौतमः ॥१४८॥

त्रैलोक्यमङ्गळं कुर्वन्मही शास्तिसुतस्तव ।
चक्रवर्ती स धर्मात्मा सार्वभौमो भविष्यति ॥१४९॥

अपरे गणकाः केचित् पुनर्वचनमब्रुवन् ।
त्रिषु लोकेषु विख्यातो भवेद्गौतमनन्दनः ॥१५०॥

संसारदुःखं लोकस्य प्रपश्यन्करुणानिधिः ।
शोकस्य च प्रतीकारं ज्ञातुं गच्छति काननम् ॥१५१॥

कायक्लेशं तदा कृत्वा तपस्तप्यति दारुणम् ।
कालेन महदाप्नोति विज्ञानं मोक्षसाधकम् ॥१५२॥

सर्वं ते सचिवश्रेष्ठ प्रोक्तवानस्म्यशेषतः ।
संसारजनितं दुःखं भूतानामिह गौतमः ॥१५३॥

दृष्ट्वा तु शोकसंतप्तो भोगांस्त्यजति सर्वदा ।
विषादस्य प्रतीकारं वक्तुमर्हसि सुव्रत ॥१५४॥

प्रत्युवाच नृपश्रेष्ठं मंत्रज्ञो मंत्रिसत्तमः ।
अवश्यंतु प्रतीकारः कर्तव्य इति मे मतिः ॥१५५॥

राजन् शृणु प्रवक्ष्यामि यन्मे मनसि वर्तते ।
आयुष्मंतं प्रपश्यामि गौतमं प्राप्तयौवनम् ॥१५६॥

उद्वाहः क्रियतामद्य पुत्रस्य तव धीमतः ।
पत्न्या स रममाणस्तु शोकं त्यजति गौतमः ॥१५७॥

मन्त्रिणस्स वचः श्रुत्वा राजा शुद्धोदनस्तदा ।
तनुजस्य विवाहाय प्रयत्नमकरोत्प्रभुः ॥१५८॥

भवानीसुव्रतव्याजात् राजा परमधार्मिकः ।
प्रासादं प्रतिचामंत्र्य पौरकन्यास्सुमध्यमाः ॥१५९॥

दर्शयामास तास्सर्वाः गौतमाय महात्मने ।
ताभ्यश्च बहुमानार्थं प्रादाद्रत्नानि गौतमः ॥१६०॥

अशोभतासु कन्यासु काचित्सर्वांगसुंदरी ।
यशोधरेति विख्याता दण्डपाणेस्सुता* स्मृता ॥१६१॥

दृष्ट्वा तु चारुवदनां कन्यां सर्वांगसुन्दरीम् ।
कोमलांगीं चारुनेत्रां राजकन्यां यशोधराम् ॥१६२॥

सन्तुष्टः परमोदारः शाक्यसिंहो बभूव ह ।
अवमुच्यात्मनः कण्ठात् मुक्ताहारं मनोहरम् ॥१६३॥

कन्यायै सुप्रबुद्धस्य प्रददौ हि मुदान्वितः ।
तेन हारेण दिव्येन शुशुभे सा यशोधरा ॥१६४॥

सिद्धार्थस्य मनोभावं ज्ञात्वा शुद्धोदनस्तथा ।
सुतस्येष्टानुसारेण विवाहं स्म चिकीर्षति ॥१६५॥

---

* सुप्रबुद्ध इतिच प्रसिद्धः ।



रूपयौवनलावण्यौदार्याण्यस्य महात्मनः ।
पश्यंती सानवद्यांगी तमेव चकमे पतिम् ॥१६६॥

—* इति षष्ठोध्यायः *—

॥ अथ सप्तमोऽध्यायः ॥

पतिसंयोगमर्हन्तीं कन्यां सम्प्राप्तयौवनाम् ।
सुतां यशोधरां दृष्ट्वा पिता चिंतापरोभवत् ॥१६७॥

एषा शुभानना शीघ्रं प्रदेया च स्वयंवरे ।
इति संचिंत्य मनसाऽकल्पयच्च स्वयंवरम् ॥१६८॥

स्वनगर्यां ततो राजा सुप्रबुद्धो महारथः ।
कनकस्तंभरुचिरं कारयामास मंटपम् ॥१६९॥

ततस्तु वासरे सौम्ये निजपुत्र्याः स्वयंवरे ।
आजुहाव नृपान् सर्वान् सुप्रबुद्धः क्षितीश्वरः ॥१७०॥

तच्छ्रुत्वा धरणीपालाश्चतुरङ्गबलान्विताः ।
आजग्मुस्त्वरितं सर्वे राजपुत्रीमभीप्सवः ॥१७१॥

अङ्गराजो महाप्राज्ञस्तथा वंगनराधिपः ।
कळिंगाधिपतिश्शूरः काशीराजश्च वीर्यवान् ॥१७२॥

राजा मगधदेशस्य शक्यसिंहोऽपराजितः ।
अर्जुनो वीरसिंहश्च देवदत्तः प्रतापवान् ॥१७३॥

एते सर्वे महेष्वासाः रङ्गं त्वरितमागताः ।
दिव्यासनेषु तिष्ठंतः निरैक्षंत यशोधराम् ॥१७४॥

यशोधरा ततस्साध्वी जगाम पितुरन्तिकम् ।
सा नमस्कृत्य पितरमिदं वचनमब्रवीत् ॥१७५॥

स्वयंवरस्तु हे तात पुनर्मह्यं न रोचते ।
यदि मे चाप्रियः कश्चित् मां लभेत स्वयंवरे ॥१७६॥

नाहं तदा वै जीवामि सत्यमेतद्वचो मम ।
यतः प्रभृति धर्मात्मा शक्यसिंहः प्रतापवान् ॥१७७॥

इह मे मन्दभाग्यायाः दृष्टेः पन्थानमागमत् ।
तदारभ्याभिलाषो मे तस्मिन्नेव प्रतिष्ठते ॥१७८॥

तस्मात्सर्वप्रयत्नेन वाक्यं मे परिपालय ।
शक्यसिंहाय धीराय मां पुनर्दातुमर्हसि ॥१७९॥

एवमुक्त्वा तु पितरं राजपुत्री यशोधरा ।
जनकस्याग्रतस्स्थित्वा विललाप वरानना ॥१८०॥

रुदन्तीं तनुजां दृष्ट्वा राजा वचनमब्रवीत् ।
स्वयंवरस्तु शास्त्रेषु क्षत्रियाणां विधीयते ॥१८१॥

अलं भद्रे विषादेन मा भूच्छंका तवानघे ।
भविष्यसि महाभागे नूनं लब्धमनोरथा ॥१८२॥

शुद्धेन मनसा वत्से पूजयस्वेष्टदेवताम् ।
दिव्यांबरधरा देवि रंगं त्वरितमाविश ॥१८३॥



ततः प्रभाते सा देवी शुचिर्भूत्वा यशोधरा ।
अपूजयन्महादेवीं विशुद्धेनांतरात्मना ॥१८४॥

सा शुक्लक्षौमवसना दिव्यगन्धानुलेपना ।
मणिनालंकृता रंगं प्रविवेश यशोधरा ॥१८५॥

तत्रागतान्महीपालान् पूजयित्वा यथाक्रमम् ।
सुप्रबुद्धमहीपाल इदं वचनमब्रवीत् ॥१८६॥

वीर्यशुल्का हि मे कन्या सर्वाभरणभूषिता ।
अग्रेसरस्तु वीराणां विंदते हि यशोधराम् ॥१८७॥

इह स्थितं धनुर्दिव्यं गन्धमाल्यविभूषितम् ।
वीर्यवन्तस्तमुद्यम्य काशयंतु पराक्रमम् ॥१८८॥

तस्य तद्वचनं श्रुत्वा नृपास्तत्र समागताः ।
कुर्वंतस्सुमहायत्नं न शेकुस्तस्य चालने ॥१८९॥

ततो धनुस्स जग्राह शक्यसिंहो महाबलः ।
धनुर्बभंज मध्ये तु लीलया राघवो यथा ॥१९०॥

ततो राजा सुप्रबुद्धः परं हर्षमवाप्तवान् ।
शक्यसिंहं महाशूरमिदं वचनमब्रवीत् ॥१९१॥

पश्यतां राजपुत्राणां धनुर्भग्नं त्वयानघ ।
तस्मान्नूनं महाबाहो तव चेयं यशोधरा ॥१९२॥

कन्यां कनकवर्णाभां सुमुखीं चारुदर्शनाम् ।
कल्याणगुणसंपन्नां देवीभक्तिपरायणाम् ॥१९३॥

शक्यसिंहाय धीराय करुणारसमूर्तये ।
असौ प्रादात् महीपालो विविधद्रहिसाक्षिकम् ॥

उत्सवांते विवाहस्य राजा परमधार्मिकः ।
ब्राह्मणेभ्यो ददौ वासान् वस्त्राणि च धनानि च ॥

नृपेन समनुज्ञातः गौतमस्सह भार्यया ।
दिव्यं रथं समारुह्य ततः स्वनगरीं ययौ ॥१९६॥

अथ वै शक्यसिंहस्य धर्मपत्नी यशोधरा ।
अचिरादेव सुमुखी श्लाघ्यं गर्भमधारयत ॥१९७॥

—* इति सप्तमोऽध्यायः *—

॥ अथ अष्टमोऽध्यायः ॥

देवी सा द्वादशे मासे पुत्रं प्रासूत भामिनी ।
पिता च मन्त्रिणस्सर्वे शिशुं दृष्ट्वा मुदान्विताः ॥१९८॥

सुखं प्रजानां दुःखं च ज्ञातुमिच्छन् स्वचक्षुषा ।
शुद्धोधनस्य पुत्रस्तु चचार महतीं पुरीम् ॥१९९॥

तत्रापश्यत्शक्यसिंहः पुरुषं जरयान्वितम् ।
शुष्कत्वचं शुष्कदेहं बंधुहीनं निरिंद्रियम् ॥२००॥

श्वेतकेशं क्षीणरक्तं बंधुमित्रैरुपेक्षितम् ।
मुहुर्मुहुः कंपमानं स्थविरं कंचिदैक्षत ॥२०१॥



अन्यत्र पुरुषं कंचित् व्याधिग्रस्तं कृशाननम् ।
स्थूलोदरं पांडुगात्रं प्रदाक्षीत् शक्यपुंगवः ॥२०२॥

अन्येद्युर्नगरे तस्मिन् शक्यसिंहो महामतिः ।
पुरुषं कंचन मृतं मीक्षांचक्रे दयान्वितः ॥२०३॥

केनोपायेन लोकेस्मिन् जरामरणपीडिताः ।
व्याधिग्रस्ताश्च मनुजाः तरेयुश्शोकस्सागरम् ॥२०४॥

इति संचिंत्य मनसा गौतमः करुणानिधिः ।
संसारदुःखजलधेः परं पारं न चैक्षत ॥२०५॥

जरामरणदुःखानि सामान्यानि मनीषिणाम् ।
विदित्वा कारणं तेषां चिकित्सां चिंतयेद्बुधः ॥२०६॥

भुंजन् भोगानिह स्थित्वा पुत्रदारसमन्वितः ।
कथं प्राप्नोति विज्ञानं संसारमलमोचनम् ॥२०७॥

तस्मादहं गमिष्यामि मुनिभिस्सेवितं वनम् ।
ध्यानेन तपसा चैव लभेयं ज्ञानमुत्तमम् ॥२०८॥

गौतमः कृतसंकल्पश्चकार गमने मतिम् ।
अथ दृष्ट्वा तु सुमुखीं धर्मपत्नीं यशोधराम् ॥२०९॥

शयानां दिव्यपर्यंके गाढनिद्रावशं गताम् ।
पुत्रेणालिंग्यमानां तां चिंतयामास गौतमः ॥२१०॥

कथं सहेत वा देवी संतापं मद्वियोगजम् ।
कथं वा जीवितं सैषा मत्ते धारयिष्यति ॥२११॥

१५

त्यक्त्वा च पितरं वृद्धं गमिष्ये वा कथं वनम् ।
किंतु लोकहितार्थाय मुंचतो नास्ति मे व्यथा ॥२१२॥

एवं संचिंत्य मनसा गौतमो वनमभ्यगात् ॥
वने तु तापसान् दृष्ट्वा परं हर्षमवाप्तवान् ॥२१३॥

— इति अष्टमोध्यायः —

## ॥ अथ नवमोऽध्यायः ॥

भार्गवस्याश्रमं गत्वा शक्यसिंहो जितेंद्रियः ।
ददर्श च महाभागं भार्गवं तपसि स्थितम् ॥२१४॥

प्रणम्य शिरसा पूज्यं गौतमो मुनिसत्तमम् ।
बभाषे प्रांजलिर्भूत्वा वाक्यं मधुरया गिरा ॥२१५॥

राजा शुद्धोदनो नाम शक्यानामधिपः स्मृतः ।
महीं शास्त्यद्य धर्मात्मा सर्वभूतहिते रतः ॥२१६॥

इक्ष्वाकुवंशे जातस्य महीपालस्य धीमतः ।
पुत्रोहं गौतमो युष्मान् ज्ञानभिक्षार्थमागतः ॥२१७॥

प्राणिजातं प्रपश्यामि व्याधिभिः परिपीडितम् ।
दृश्यते हि जगत्सर्वं जरामरणपीडितम् ॥२१८॥

कारणं तस्य दुःखस्य प्रतीकारं तथैव च ।
ज्ञेयं यच्चास्ति मर्त्यानां तत्सर्वं वक्तुमर्हसि ॥२१९॥



श्रुत्वा तद्वचनं राज्ञः प्रोवाच मुनिसत्तमः ।
तपसा बहवो राजन् प्रापुर्ज्ञानमुत्तमम् ॥२२०॥

प्रशांतमनसा त्वंच तपस्तीव्रं समाचर ।
प्राप्नोषि परमं ज्ञानं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥२२१॥

एवमुक्तो गौतमस्तु तपोऽतप्यत दारुणम् ।
तथापि शक्यसिंहश्च न लेभे ज्ञानमुत्तमम् ॥२२२॥

भार्गवस्याश्रमं त्यक्त्वा गयां प्राप स गौतमः ।
औदुम्बरस्य च्छायायां तस्थौ तपसि धार्मिकः ॥२२३॥

कदाचिच्छक्यसिंहस्तु पीडितश्च क्षुधाभवत् ।
कंचिच्चांडालमायांतं पक्वमन्नमयाचत ॥२२४॥

गौतमाय पयो दत्वा चांडालश्चाब्रवीद्वचः ।
नीचवर्णः कथं दद्यां पक्वान्नं याचितं त्वया ॥२२५॥

पीत्वा पयश्शक्यसिंहश्चांडालमिदमब्रवीत् ।
प्रजासु नियता वर्णाः निजकर्मविभागतः ॥२२६॥

धर्मस्सत्यमहिंसा च दृश्यन्ते येषु येषु वै ।
त एव सर्ववर्णेषु श्रूयन्ते पुरुषोत्तमाः ॥२२७॥

शूद्रयोनिषु जाताश्च तथा चांडालयोनिषु ।
बहवो मुनयस्सन्ति सर्ववर्णैस्सुपूजिताः ॥२२८॥

एवमुक्त्वा महाप्राज्ञः पुनस्तप उपाश्रितः ।
अथ रात्र्यां व्यतीतायां भगवान् गौतमःप्रभुः ॥२२९॥

ध्यानेन तपसा चैव परं बोधमवाप्तवान् ।
लब्ध्वा तु वांछितं ज्ञानं प्रहृष्टोभून्महामतिः ॥२३०॥

— इति नवमोऽध्यायः —

॥ अथ दशमोऽध्यायः ॥

ततस्त्यक्त्वा गयां पुण्यां शाक्यसिंहो महामुनिः ।
परं ज्ञानं बोधयितुं काशीक्षेत्रं जगाम सः ॥२३१॥

काश्यां च गोतमश्श्रीमान् सर्वभूतहिते रतः ।
बोधयामास सर्वेभ्यः आत्मज्ञानमनुत्तमम् ॥२३२॥

यतःप्रभृति धर्मात्मा परं बोधमवाप्तवान् ।
गौतमस्तु तदारभ्य लोके बुद्ध इति स्मृतः ॥२३३॥

कदाचिज्जान्हवीतीरे स्थिते बुद्धे महात्मनि ।
यज्ञार्थं नीयमानांश्च पशूनैक्षत गौतमः ॥२३४॥

सत्रेष्वपि प्राणिवधं गौतमस्सोढुमक्षमः ।
तन्निरोधाय धर्मात्मा यागशालां जगाम ह ॥२३५॥

तत्रापश्यन्महाप्राज्ञः ब्राह्मणान् वेदपारगान् ।
काशीराजं च होतारमन्यां स्तत्र समागतान् ॥२३६॥

तान्सर्वान् यज्ञनिरतान् समीक्ष्य च समंततः ।
महात्मा प्रांजलिर्भूत्वा प्राह गम्भीरया गिरा ॥२३७॥



प्राणिहिंसा महाभाग न कर्तव्या कदाचन ।
प्राणा यथा मनुष्याणां भूतानामपि ते प्रियाः ॥२३८॥

विदित्वैवं बुधास्सर्वे दयां कुर्वन्तु साधवः ।
मोचयित्वा पशून्सर्वान् लभध्वं विपुलं यशः ॥२३९॥

पापकृत्येन लोकेस्मिन् शुभं कोपि न विंदते ।
कुर्वतश्शुभकर्माणि मानवा यांति सद्गतिम् ॥२४०॥

ये ये कुर्वंति कर्माणि सङ्गं त्यक्त्वा फलाफले ।
तेषां महानुभावानां पुनर्जन्म न विद्यते ॥२४१॥

मनसा कर्मणा वाचा सत्यमेव समाचरेत् ।
कामक्रोधान्परित्यज्य धर्मेषु निरतो भवेत् ॥२४२॥

गौतमस्य वचः श्रुत्वा ब्राह्मणास्तत्र संगताः ।
उत्सृज्य तान् यज्ञपशून् प्राप्नुवन् स्वगृहान् प्रति ॥

उपदेशेन दिव्येन बुद्धः परमधार्मिकः ।
सम्पादयन् बहूञ्छिष्यान् चचार धरणीतले ॥२४४॥

महाप्राज्ञो बोधयितुं ज्ञानं निर्वाणसाधकम् ।
स्थापयामास सर्वत्र पुण्यान्यायतनानि च ॥२४५॥

गौतमस्तु कुशीपुर्यां उषित्वा शाश्वतीस्समाः ।
एकाशीतितमे वर्षे निर्वाणं परमं ययौ ॥२४६॥

तस्य गौतमबुद्धस्य मुखपद्माद्विनिस्सृतम् ।
पीत्वा ज्ञानामृतं दिव्यं के न यांति परां गतिम् ॥२४७॥

शक्यसिंहाय धीराय करुणारसमूर्तये ।
असौ प्रादात् महीपालो विधिवद्वह्निसाक्षिकम् ॥

उत्सवांते विवाहस्य राजा परमधार्मिकः ।
ब्राह्मणेभ्यो ददौ वासान् वस्त्राणि च धनानि च ॥

नृपेन समनुज्ञप्तः गौतमस्सह भार्यया ।
दिव्यं रथं समारुह्य ततः स्वनगरीं ययौ ॥१९६॥

अथ वै शक्यसिंहस्य धर्मपत्नी यशोधरा ।
अचिरादेव सुमुखी श्लाघ्यं गर्भमधारयत् ॥१९७॥

—* इति सप्तमोऽध्यायः *—

॥ अथ अष्टमोऽध्यायः ॥

देवी सा द्वादशे मासे पुत्रं प्रासूत भामिनी ।
पिता च मन्त्रिणस्सर्वे शिशुं दृष्ट्वा मुदान्विताः ॥१९८॥

सुखं प्रजानां दुःखं च ज्ञातुमिच्छन् स्वचक्षुषा ।
शुद्धोधनस्य पुत्रस्तु चचार महतीं पुरीम् ॥१९९॥

तत्रापश्यत्शक्यसिंहः पुरुषं जरयान्वितम् ।
शुष्कत्वचं शुष्कदेहं बंधुहीनं निरिंद्रियम् ॥२००॥

श्वेतकेशं क्षीणरक्तं बंधुमित्रैरुपेक्षितम् ।
मुहुर्मुहुः कंपमानं स्थविरं कंचिदैक्षत ॥२०१॥



अन्यत्र पुरुषं कंचित् व्याधिग्रस्तं कृशाननम् ।
स्थूलोदरं पांडुगात्र प्रदार्शित् शक्यपुंगवः ॥२०२॥

अन्येद्युर्नगरे तस्मिन् शक्यसिंहो महामतिः ।
पुरुषं कंचन मृत मीक्षांचक्रे दयान्वितः ॥२०३॥

केनोपायेन लोकेस्मिन् जरामरणपीडिताः ।
व्याधिग्रस्ताश्च मनुजाः तरेयुश्शोकस्सागरम् ॥२०४॥

इति संचिंत्य मनसा गौतमः करुणानिधिः ।
संसारदुःखजलधेः परं पारं न चैक्षत ॥२०५॥

जरामरणदुःखानि सामान्यानि मनीषिणाम् ।
विदित्वा कारणं तेषां चिकित्सां चिंतयेद्बुधः ॥२०६॥

भुंजन् भोगानिह स्थित्वा पुत्रदारसमन्वितः ।
कथं प्राप्नोति विज्ञानं संसारमलमोचनम् ॥२०७॥

तस्मादहं गमिष्यामि मुनिभिस्सेवितं वनम् ।
ध्यानेन तपसा चैव लभेयं ज्ञानमुत्तमम् ॥२०८॥

गौतमः कृतसंकल्पश्चकार गमने मतिम् ।
अथ दृष्ट्वा तु सुमुखीं धर्मपत्नीं यशोधराम् ॥२०९॥

शयानां दिव्यपर्यंके गाढनिद्रावशं गताम् ।
पुत्रेणालिंग्यमानां तां चिंतयामास गौतमः ॥२१०॥

कथं सहेत वा देवी संतापं मद्वियोगजम् ।
कथं वा जीवितं सैषा मदृते धारयिष्यति ॥२११॥

तस्य दिव्योपदेशेभ्यो गौतमस्य महामुनेः ।
नीतिबोधाय वाक्यानि संगृहीतानि यत्नतः ॥२४८॥

सुखबोधाय बालानां नीतिसारसमन्वितम् ।
श्री बुद्धचरितं दिव्यं यथाश्रुत मुदीरितम् ॥२४९॥

इति श्री बुद्धचरितामृतं

* समाप्तम् *